Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 1 | ISSN : 2582-0095

# सुबन्तपदाविवेचन क्रमे भट्टोजिदीक्षितमताऽनुसारेण कथं निरुपणम्

**डॉ. छगनलालमहोलिया**
सहाचार्यः (संस्कृतः),
श्रीरतनलालकंवरलालपाटनीराजकीयस्नातकोत्तरः महाविद्यालयः, किशनगढ़, अजमेरः।

**Article Info**
Volume 4 Issue 1
Page Number: 129-131
**Publication Issue :**
January-February-2021
**Article History**
Accepted : 02 Feb 2021
Published :15 Feb 2021

**सारांशः–**'क्रियाजन्यफलाश्रयं कर्म 'इत्येव सूत्र्यते तर्हि " वारणार्थानामीप्सितः " इति सूत्रस्यापवादः भवति अर्थात् 'यवेभ्यः यां वारयति " इत्यत्र वारणार्थकधातयोगे भवशब्देऽपि कर्मसंज्ञा भविष्यति अर्थात् अपादानसंज्ञायाः आपत्तिः स्यात् । भवशब्देऽपि कर्मसंज्ञा न विधेया तस्मात् कारणात् अत्र इप्सिततमस्य कर्म संज्ञा विधेया । अतः अनीप्सितविषये पथक सुत्रमावश्यकं भवति अतः 'क्रियाजन्यफलाश्रयत्वं कर्मत्वं ' इति सिद्ध्यति ।

**मुख्यशब्दः–** सुबन्तपदम्, भट्टोजिदीक्षित,क्रिया, सूत्रम्, व्याकरणम्।

सुबन्तपदविवेचनक्रमे भट्टोजिदीक्षितनिर्मितां कारिकामाश्रित्य सुबर्थो निरूपितः ।

" आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ।।"

तत्र कस्याः विभक्तेः कोऽर्थ इति जिज्ञासायामुक्तं कौण्डभट्टेन द्वितीया तृतीया सप्तमीनामाश्रयोऽर्थः । अथेदानी कर्मत्वविचारः इति विषयोपरि व्याख्यानं क्रियते । " कर्मणि द्वितीया " ( 2 / 3 / 2 ) [1]

कर्मत्ववाचिका द्वितीया तस्यार्थः । अर्थात् ' कर्मणि द्वितीया ' इति अनुशासनाद् द्वितीयार्थकत्वं लभ्यते तथापि " कर्तुरीप्सिततममित्यनेन क्रियाजन्यफलाश्रयस्यैव कर्मसंज्ञा विधीयते तत्र क्रियाफलयोर्धातलभ्यत्वादाश्रयमानं द्वितीयार्थ इति फलति । आश्रयत्वञ्च फलाश्रयत्वञ्च । ' कर्तुरीप्सिततमं कर्म " इत्यस्मिन् सूत्रे " ईप्सिततम् ' शब्दः ' आप ' धातोः इच्छार्थे सन् प्रत्यये " मतिबुद्धिपूजार्थेभ्यश्च क्त " इति सूत्रेण वर्तमानकालिककर्मणि क्तप्रत्ययः स्यात् । " कर्तुः " इति पदे " क्तस्य च वर्तमाने "इति सूत्रेण कर्तरि षष्ठी भवति । आप्तिश्चात्र सम्बन्धः विद्यते । अतः कर्तुः क्रियया आप्तुमिष्टतमं कारकं। कर्मसंज्ञं भवति इत्यर्थः । अत्र क्तप्रत्ययार्थवर्तमानत्वस्य अविवक्षणाच्च भूते भाविनि च कर्मत्वं सिद्ध्यति।[2] तत्र फलस्य कर्तृसम्बन्धः स्यात् क्रियाजन्यफलाश्रयत्वेन एवञ्च' क्रियाजन्यफलाश्रयत्वं कर्मत्वं " इति सिद्धम् । तत्र क्रिया धातुतः लभ्यतेऽन्यजनकभावस्य च संसर्गमर्यादया ( विनैव पदार्थत्वं ) भानं सम्भवति । अतः ' अनन्य लभ्योहि शब्दार्थ ' इति न्यायेन फलमात्रम् द्वितीयार्थ इति । तच्च फलं ' ग्रामं गच्छति ' इत्यत्र गमनरुपक्रियाजन्यसंयोग एव, तच्छालित्वं ग्रामस्य विद्यते इति ग्रामस्य कर्मत्वोपपत्तिः ।' तथायुक्तञ्चानीप्सितम् " इत्यस्मिन् सूत्रे अनीप्सितेऽपि कर्मसंज्ञा स्यात् इप्सितानीप्सितत्वयोः शाब्दबोधे भानाभावेन संज्ञायामेव उपयोगः भवति ।

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

यदि अत्र ' क्रियाजन्यफलाश्रयं कर्म ' इत्येव सूत्र्यते तर्हि " वारणार्थानामीप्सित: " इति सूत्रस्यापवाद: भवति अर्थात् ' यवेभ्य: यां वारयति " इत्यत्र वारणार्थकधातयोगे भवशब्देऽपि कर्मसंज्ञा भविष्यति अर्थात् अपादानसंज्ञाया: आपत्ति: स्यात् । भवशब्देऽपि कर्मसंज्ञा न विधेया तस्मात् कारणात् अत्र इप्सिततमस्य कर्म संज्ञा विधेया । अत: अनीप्सितविषये पथक सुत्रमावश्यकं भवति अत: ' क्रियाजन्यफलाश्रयत्वं कर्मत्वं ' इति सिद्ध्यति ।

ओदनं पचति ' इत्यत्र विक्लित्याश्रयत्वात् ओदनस्य कर्मसंज्ञा । 'घटं करोति' इत्यत्र उत्पत्याश्रयत्वात् घटस्य कर्मसंज्ञा भवति। 'जानाति' इत्यत्रावरणभङ्गरूपधात्वर्थफलाश्रमत्वात् कमतशा भवति, अतीताऽनागतादिपरोक्षस्थलेऽपि ज्ञानजन्यश्च तस्मादवश्यकत्वात् । अन्यथा ' यथा पूर्वं न जानामि इत्यापत्ते: ।

चैत्र: ग्रामं गच्छति इत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यसंयोगरूपफलाश्रयत्वात् कर्मतापत्तौ चैत्र: चैत्रं गच्छति इति इत्यापत्ति: स्यात् । तस्य निवारणार्थं वैयाकरणा: स्वमतं स्थापयन्ति यत् चैत्रे प्राप्तकर्मसंज्ञाया: कर्तृसंज्ञया बाधते । प्रभागत: काशीं गच्छति चैत्रे, प्रयागं गच्छति ' इत्यापतिश्च । अत्र प्रयागस्य कर्मसंज्ञा सम्भवा नास्ति यतोहि गम्धातो: अर्थ: उत्तरदेशसंयोगानुकूलव्यापार: । उत्तरदेशसंयोगस्याश्रया काशी स्यात् न तु प्रयाग: अत: प्रयागे कर्मसंज्ञा न भवति।[3] पुन: अत्र नैयायिका: परसमवेतत्वं योजयित्वा स्वमतं प्रस्तूयन्ते । " परसमवेतक्रियाजन्यफलाश्रयत्वे द्वितीयेति स्वीक्रियते तर्हि । गौरवं स्यात् एवञ्च पाचयति तण्डुल: कृष्णेन इत्यत्र कृष्णस्यापि प्रेरणार्थकक्रियाजन्यपाकव्यापाररूपफलाश्रमत्वात् द्वितीयापत्ति: । ।

**अत्र कर्म सप्तविधं**

**अयं द्वितीयार्थ: ईप्सितानीप्सितभेदेन द्विविध: ।**

**निर्वल्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधामतम् ।**

**तच्चेप्सिततमं कर्म, चतुर्दाऽन्यन्तु कल्पितम् । ।**

**औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम् ।**

**संज्ञान्तरैरनाख्यातं यद्यच्चाप्यज्यपूर्वकम् ।**[4]

अर्थात् ईप्सितकर्म त्रिविधं निर्वल्यं विकार्य प्राप्य कर्म

अनीप्सितकर्म चतुर्विधम् औदासीन्येन प्राप्तं, कर्तुरनीप्सितम्[5]

संज्ञान्तौरनाख्यातं, अन्यपूर्वकम् ।

1. निर्वल्यकर्म – यदसञ्जायते सद्वा जन्मना यत्प्रकाशते तन्निर्वल्यम् इति । अर्थात् यत् कर्म नैयायिकरीत्यानुसारेण पूर्वं तु असत् आसीत् किन्तु पश्चात् उत्पन्नं भूत्वा प्रत्यक्षं भवति अर्थात् सांख्यमतानुसारेण पूर्वं कर्मण: कार्यकारणभावं भूत्वा यद् आविर्भावं भवति तत् निर्वल्यकर्म । यथा घटम् करोति, तण्डुलं पचति अत्र घटं, तण्डुलं निर्वर्त्य कर्म: ।
2. विकार्यकर्म – विकार्यं तु द्वेधा कर्मव्यवस्थितम् ।
3. प्रकृत्युच्छेदसम्भूत
4. गुणान्तरोत्पत्या

कार्यसमये कर्मण: प्रकृति: विद्यमाना भवेत् अथवा न भवेत् तत् परिणामित्वेन विवक्षितं कर्म विकार्यम् इति उच्यते ।

5. यथा भस्म करोति । अत्र भस्म प्रकृतिकाष्ठस्य विनाशात् उत्पन्नं भवति ।

6. सुवर्णं कुण्डलं करोति, अत्र गुणान्तरोपल्या सुवर्णस्य परिवर्तनां कुण्डलरूपेण जायते । अतः कुण्डलगुणान्तरोपत्या कर्म ।

7. प्राप्यकर्म

यत्र क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते

दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते

यथा – देवदत्तः घटं पश्यति, देवदत्तः ग्रामं गच्छति । अत्र देवदत्तस्य दर्शनात् अथवा गमनात् । घट अथवा ग्रामे किमपि परिवर्तनं न दृश्यते अतः घटः प्राप्यकर्म ।

अनीप्सितकर्म चतुर्विधः

4. औदासीन्यकर्म – अनिच्छया प्राप्यकर्म उदासीनकर्म ।

यथा – ग्रामं गच्छन् तृणं स्पृशति । अत्र ' तृण ' औदासीन्येन प्राप्यकर्म ।

5. अनीप्सितकर्म – द्वेष्यकर्म अर्थात् यत्र कर्ता क्रियया अनीप्सित ( द्वेष्य ) कर्माणि करोति तत्र अनीप्सितकर्म ।

यथा – ओदनं भुञ्जानो विषं भुङ्क्ते । अत्र ' विष ' कर्तुः द्वेष्यकर्म ।

6. संज्ञान्तरैरनाख्यातं कर्म – यत्र कर्मातिरिक्त – अपादानादि – अन्यसंज्ञायाः प्राप्तिर्भवति तत्र संज्ञान्तरैरनाख्यातं कर्म ।

यथा – ' गां दोग्धि पयः ' अत्र ' गो ' शब्द – अपादानत्वेन अविवक्षितोऽस्ति ।

7. अन्यपूर्वककर्म – यत्र कर्मातिरिक्त अन्य – अधिकरणादिसंज्ञा प्राप्यते किन्तु ' अधि ' इत्यादिपूर्वकान् शीधातोः कर्मसंज्ञा भवेत् तत् अन्यपूर्वककर्म ।

यथा – " अधिशेते वैकुण्ठं हरिः " अत्र ' अधि ' पूर्वकशीङ्धातोः आधारस्य " अधिशीङ्स्थासां कर्म " इति सूत्रेण वैकुण्ठस्य कर्मसंज्ञा भवति ।

सन्दर्भः

1.सिद्धान्तकौमुदी– कारकप्रकरणम्.डॉ राममुनि पाण्डेयः

2.सिद्धान्तकौमुदी– कारकप्रकरणम्.डॉ.आनन्द श्रीवास्तवः

3.सिद्धान्तकौमुदी– कारकप्रकरणम्.डॉ. शिवनाराणशास्त्री

4.सिद्धान्तकौमुदी– कारकप्रकरणम्.डॉ राममुनि पाण्डेयः

5.सिद्धान्तकौमुदी– कारकप्रकरणम्.डॉ राममुनि पाण्डेयः